॥श्रीः॥
व्रजजीवन प्राच्यभारती ग्रन्थमाला
१

पण्डितवरश्रीमदमरसिंहविरचितः

## नामलिङ्गानुशासनं

नाम

# अमरकोषः

विद्वद्वरश्रीभानुजिदीक्षितकृतया 'सुधा'ख्यया
'रामाश्रमी'त्यपरनामधेयया व्याख्यया सहितः

संस्कर्त्ता:
महामहोपाध्यायः पण्डित शिवदत्तदाधिमथः

संशोधकः
पण्डित वासुदेव लक्ष्मणशास्त्री पणशीकरः

चौखम्बा संस्कृत प्रतिष्ठान
दिल्ली

THE
VRAJAJIVAN PRACHYABHARATI GRANTHAMALA
1

# NĀMALIṄGĀNUŚĀSANA

*alias*

# AMARAKOṢA

OF

## AMARASIṀHA

*With the Commentary*

## VYĀKHYĀSUDHĀ or RĀMĀŚRAMĪ

OF

## BHĀNUJI DĪKŚITA

*Edited with notes by*

M. M. PANDIT SIVADATTA DĀDHIMATHA

*Revised by*

PT. VĀSUDEVA LAKṢMAṆA PANAŚĪKARA

CHAUKHAMBA SANSKRIT PRATISHTHAN
DELHI

# भूमिका

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयनिष्पत्तिर्हि सर्वाभीप्सिता। सा च श्रुतिस्मृतिपुराणेतिहासादितत्तच्छास्त्रार्थज्ञानाधीना। तत्तदर्थज्ञानं च तत्तदवान्तरवाक्यार्थज्ञानाधीनम्। तत्तद्वाक्यार्थज्ञानं च तत्तत्पदार्थज्ञानाधीनम्। तत्तत्पदार्थज्ञानं च तत्तत्पदशक्तिग्रहाधीनम्। तत्तत्पदशक्तिग्रहे च—

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥'

इति शिष्टोक्तिदर्शिते शक्तिग्रहोपायेषु कोषस्यैव मुख्यकारणत्वम्। व्याकरणस्य यौगिकशब्दशक्तिग्राहकत्वेऽपि रूढ-योगरूढयोः शक्तिग्राहकत्वाभावात्। उपमानादीनां स्वतः शक्तिग्राहकत्वाभावात्। कोषेषु च केवलनामानुशासनभूतानां केवललिङ्गानुशासनभूतानां च लाघवेनोपकारकत्वाभावेन नामलिङ्गोभयानुशासनत्वेनामरसिंहविरचितस्यास्यैव कोषस्य सर्वोपकारकत्वम्। 'अयममरसिंहः कदा किञ्जातीयः कुत्रत्यं महीमण्डलं मण्डयाञ्चकार' इति न निश्चितम्। परन्तु देवसामान्यनामान्युक्त्वा देवविशेषनामप्रारम्भे बुद्धनाम्नां लेखनेन बौद्धत्वमस्यावसीयते।

केचित्तु—

'धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥'

इति वैक्रमनवरत्नख्यापकश्लोकतो विक्रमसमकालकत्वममरसिंहस्य वदन्ति।

परे तु—

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः॥'

इति पद्यानुरोधेन पाणिनिसमन्तभद्रयोरन्तरालभवत्वं ब्रुवते। अत्रेदं बोध्यम्—इदं न क्रमबोधकम्, पाणिनिमहाभाष्यप्रवृत्तिसमकालनिष्पत्तिकचान्द्रव्याकरणकर्तृचन्द्राचार्यस्य पाणिनितः प्राग्लेखनात्।

अस्य वैयाकरणत्वं तु—

'अमरसिंहो हि पापीयान्सर्वं भाष्यमचूचुरत्।'

इति पद्यात्सकलभाष्यतत्त्वज्ञत्वस्य प्रतीतेः प्रतीतमेव ' इत्थं भङ्ग्यन्तरेणोक्तिस्तु बौद्धत्वेन सकलवैदिकविरुद्धत्वात्। अस्य सर्वोपकारकत्वादेव बहुभिरस्य व्याख्याः कृताः। तासु मद्दृष्टास्तु—

( १ ) **अमरकोशोद्घाटनम्** भट्टक्षीरस्वाम्युत्प्रेक्षितम्।
तत्र च श्रीभोज-राजशेखर-भट्टि-माघ-प्रभृतीनां नामानि सन्ति।

( २ ) **पदचन्द्रिका** रायमुकुटेन १३५३ शकाब्दे निर्मिता।
तत्रत्यग्रन्थादीनां नामानि डॉक्टर् श्रीयुतभाण्डारकरैः प्रकाशितानि।

॥ श्रीः ॥

# श्रीमदमरसिंहविरचितः

# अमरकोषः ।

## व्याख्यासुधाख्यया व्याख्यया समेतः ।

### प्रथमं काण्डम् ।

वल्लवीवल्लभं नत्वा गुरुं(गिरं) भट्टोजिदीक्षितम् ।
आ(अ)मरे विदधे व्याख्यां मुनित्रयमतानुगाम् ॥

प्रारिप्सितप्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबबन्ध—

**यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।**
**सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥**

**यस्येति** ॥ हे अनघाः, भवद्भिः स धीराः सेव्यताम् । न अघं पापं येषां तेऽनघा निष्पापाः । सुकृतिन इति यावत्। सुकृतिन एव तं सेवितुं प्रभवन्तीति त एव संवोध्यन्ते 'धर्मेण पापमपनुदति' इति श्रुतेः । धियं राति ददाति । 'रा दाने' ( अ० प० अ० ) अस्मात् 'क्विप् च' ( ३।२।७६ ) इति क्विप् । धीरा ज्ञानप्रदो गुरुः । अनेन 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति श्रुत्यर्थ उपदिष्टः । 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति गुरुसेवायाः फलमाह—श्रिये चामृताय चेति । चद्वयमुभयोः प्राधान्यद्योतनाय । भुक्तिमुक्तिप्राप्तिर्गुरुसेवातो भवति । 'क्रियार्थोपपदस्य—' ( २।३।१४ ) इति चतुर्थी । तादर्थ्ये ( वा० २।३।१३ ) वा । तदुक्तं भागवते—'योगर्द्धिमापुरुभयीं यदुहैहयाद्याः' इति । ननु गुरोः श्रियोऽभावात्ततः कथं सा प्रार्थ्य(प्य)त इत्याशङ्क्याह—यस्येति । अस्य गुरोरी लक्ष्मीरस्ति, गुणाश्च सन्ति । तदुक्तं भागवते—'ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं लब्ध्दया यतोऽजित' इति । 'सत्यं शौचं दया क्षान्तिस्त्यागः संतोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः । स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च' इत्यादयो गुणाः । कीदृशस्यास्य—ज्ञानदयासिन्धोः । ज्ञायतेऽनेनेति ज्ञानं शास्त्रम्, दया निष्कारणपरदुःखप्रहाणेच्छा । तयोः सिन्धोरिव । शास्त्रसंपन्नस्य, दयापूर्णस्य च । अनेन 'श्रोत्रियं ब्रह्मनिष्ठम्' इति विशेषणयोर्मध्ये श्रोत्रियत्वमुक्तम् । स ज्ञानवानपि किमर्थं दास्यतीत्यतो दयावत्त्वमुक्तम् । 'दयालोरसमर्थस्य दुःखायैव दयालुता' इत्यतो ज्ञानवत्त्वमुक्तम् । कीदृशस्य—अगाधस्य । न गाधस्तलस्पर्शो यस्य गम्भीरस्य । विषयानाकृष्टस्येति यावत् । यद्वा अगं शैलं वृक्षं वा आप्नोति । 'अन्येभ्योऽपि दृश्यते' ( वा० ३।२।१०१ ) इति आप्नोतेः ( आप्लृ व्याप्तौ । स्वा० प० अ० ) डः । टिलोपः ( ६।४।१४३ ) । सवर्णदीर्घः ( ६।१।१०१ ) तमगं दधाति मनसेत्यगाधः । तस्य । परमेश्वरभक्तस्येति यावत् । कीदृशो धीराः—अक्षयः । अः वासुदेवः; तस्मिन् क्षयो ज्ञानं निवासो वास्य सोऽक्षयः । अनेन ब्रह्मनिष्ठतारूपं द्वितीयं विशेषणमुक्तम् । यद्वा न क्षयो हिंसा यस्य । 'क्षीष हिंसायाम्' ( क्र्या० प० अ० ) 'एरच्' ( ३।३।५६ ) । पूर्वत्र तु 'क्षि निवासगत्योः' ( तु० प० अ० ) । परपीडापहारकः । 'यस्मान्नोद्विजते लोकः' इति गीता । **अथवा** स धीरा मया सेव्यताम् । स कः । यस्य गुणा अनघाः । न अघं येभ्यस्तेऽनघाः । पापनिवर्तका इति यावत् । 'यशः कलिमलापहम्' इति भागवतात् । शेषं समानम् । 'आशिषि लिङ्लोटौ' ( ३।३।१७३ ) इति कर्मणि लोट् । इत्थं हि गुरुसेवापरान् प्रति कर्तव्यत्वेनोपदिश्यते, स्वयं वा प्रार्थ्यते । गुरुसेवामाहात्म्यं च ब्रह्मवैवर्तादौ प्रसिद्धम् । भागवतेऽपि—'यथाऽहं ज्ञानदो गुरुः' इति, 'तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा' इति च । एवं 'लक्ष्मीवान्, कल्याण ( निर्मल )-गुणः, शास्त्रसंपन्नो, दयापूर्णो, विषयानाकृष्टो, विष्णुभक्तो, विष्णुसाक्षात्कारवान्, ज्ञानदो, गुरुः संपत्प्राप्त्यर्थं मोक्षप्राप्त्यर्थं च निष्पापैरधिकारिभिः, मया वा सेव्यताम्' इति परेभ्यो हितमुपदिशन्, स्वहितमाशंसमानो वा ग्रन्थकृदाशीर्वादलक्षणम् ( इति ) लक्ष्मीस्मरणलक्षणं च मङ्गलमाचचार । यत्तु मुकुटः—'स्वेष्टदेवतासंकीर्तनाद्विशिष्टादृष्टमुत्पिपादयिषुः' इत्यवोचत् । तन्न । देवतावाचकपदस्यात्रादर्शनात्, आशीर्लोटो दर्शनाच्च । स्वामी तु—'जिनमनुस्मृत्य' इति स्मरणलक्षणं मङ्गलमाह । तन्न । जिनवाचकपदस्यात्रादर्शनात्,